पितॄणां वल्लभं नित्यमृषीणां परमं प्रियम्। नन्दयुर्ल्ललिता तद्वत्तीर्थं मायापुरी तथा। शुभं मित्रपदं राजंस्ततः केदारमुत्तमम्। गङ्गासागरमित्याहुः सर्वतीर्थमयं शुभम्। तीर्थं ब्रह्मसरस्तद्वत् शतद्रुः सलिलाह्रदः। तीर्थन्तु नैमिषञ्चैव सर्वतीर्थफलप्रदम्। गङ्गोद्भेदस्तु गोमत्यां यत्रोद्भूतः सनातनः। तथा यज्ञवराहस्तु देवदेवश्च शूलधृक्। यत्र तत् काञ्चनद्वारमष्टादशभुजो हरः। नेमिस्तु धर्म्मचक्रस्य शीर्णो यत्राभवत् पुरा। तदेतन्नैमिषारण्यं सर्वतीर्थनिषेवितम्। देवदेवस्य तत्रापि वराहस्य च दर्शनम्। यः प्रयाति स पूतात्मा नारायणपुरं व्रजेत्। कोकामुखं परं तीर्थं ब्रह्मणोऽव्यक्तजन्मनः। पुष्करारण्यसंस्थोऽसौ यत्र देवः पितामहः। विरिञ्चिदर्शनं श्रेष्ठं त्वपवर्गफलप्रदम्। कृतं तेन महापुण्यं सर्वपापनिसूदनम्। यत्राद्यो नरसिंहस्तु स्वयमेव जनार्द्दनः। तीर्थमिक्षुमती नाम पितॄणां वल्लभा सदा। तुष्यन्ति पितरो नित्यं गङ्गायमुनसङ्गमे। कुरुक्षेत्रं महापुण्यं यत्र मार्गोऽपि लभ्यते। अद्यापि पितृतीर्थं तत् सर्वकामफलप्रदम्। नीलकण्ठमिति ख्यातं पितृतीर्थं नराधिप!। तथा भद्रसरः पुण्यं सरोमानसमेव च। मन्दाकिनी तथाच्छोदो विपाशाथ सरस्वती। पूर्वमिन्द्रपदं तद्वद्वैद्यनाथं महासुखम्। गोदावरी तथा पुण्या तथा कालञ्जरं शुभम्। वंशोद्भेदं हरोद्भेदं गङ्गोद्भेदं महालयम्। भद्रेश्वरं विष्णुपदं नर्म्मदाद्वारमेव च। गयापिण्डप्रदानेन समान्याहुर्महर्षयः। एतानि पितृतीर्थानि सर्वपापहराणि च। स्मरणादपि लोकानां किमु श्राद्धप्रदायिनाम्। ओङ्कार पितृतीर्थन्तु कावेरी कपिलोदकम्। कुरुक्षेत्राच्छतगुणम् तस्मिन् सुखादिकम्भवेत्। शक्रतीर्थन्तु विख्यातं तीर्थं सोमेश्वरं स्मृतम्। सर्वव्याधिहरं पुण्यं फलं कोटिशताधिकम्। श्राद्धे दाने तथा होमे स्वाध्याये जपसन्निधौ। छायावरोहणं नाम देवदेवस्य शूलिनः। अवतारं रोचयानो ब्राह्मणावसथे शुभे। जातं तत् सुमहापुण्यं तथा चर्म्मण्वती नदी। नदी च वरणा तद्वत्तीर्थं हौताशनं परम्। भैरवं भृगुतुङ्गञ्च गौरीतीर्थमनुत्तमम्। तीर्थं वैनायकं नाम वज्रेश्वरमनुत्तमम्। तथा पापहरं नाम पुण्या वेत्रवती नदी। शूलतापी पयोष्णी च पयोष्णीसङ्गमस्तथा। महाबोधी पदेनापि नागतीर्थमवन्तिका। तथा वेणा नदी पुण्या महाशालस्तथैव च। महारुद्रो महालिङ्गो दशार्णा च महानदी। शतरुद्रागता वापि तथा पितृपदं परम्। युद्धःवाराहिकं तद्वन्नदौ द्वौ शोणघर्घरौ। कालिका च नदी पुण्यं पितरा च नदी तथा। एतानि पितृतीर्थानि शस्यन्ते स्नानदानयोः। श्राद्धमेतेषु यद्दत्तं तदनन्तफलं स्मृतम्। शनीचाटनदीधारा शवक्षीरनदी तथा। द्वारका कृष्णतीर्थञ्च तथाप्युत सरस्वती। नदी मणिमती नाम तथा च गिरिकर्णिका। धुतपापं तथा तीर्थं समुद्रे दक्षिणे तथा। गोकर्णो गणकर्णश्च तथा च पुरुषोत्तमः। श्रीशैलं शाकतीर्थञ्च नारसिंहमतः परम्। महेन्द्रश्च तथा पुण्यः पुण्या चापि महानदी। एतेष्वपि सदा श्राद्धमनन्तफलमश्नुते। दर्शनादपि पुण्यानि सद्यः पापहराणि च। तुङ्गभद्रा नदी पुण्या तथा भीमनदी सरित्। भीमेश्वरं कृष्णवेणा कावेरी वञ्जुरा नदी। नदी गोदावरी पुण्या त्रिसन्ध्या तीर्थमुत्तमम्। तीर्थं त्रैयम्बकं नाम सर्वतीर्थनमस्कृतम्। यत्रास्ते भगवान् भीमः स्वयमेव त्रिलोचनः। श्राद्धमेतेषु तीर्थेषु दत्तं शतगुणं भवेत्। स्मरणादपि पापानि व्रजन्ति शतधा नृप!। श्रीपर्णी च नदी पुण्या व्यासतीर्थमनुत्तमम्। तथा मत्स्यनदीधारा शिवधारा तथैव च। भवतीर्थञ्च विख्यातं पुण्यतीर्थञ्च शाश्वतम्। पुण्यं रामेश्वरं तद्वदेलापुरमनुत्तमम्। अङ्गारभूत्यं विख्यातमात्मदर्शमनायुधम्। तीर्थं वृतेश्वरं तद्वत्तथा कोकामुखं परम्। गोवर्द्धनं हरिश्चन्द्रं पृथुचन्द्रं पृथूदकम्। सहस्राक्षं हिरण्याक्षं तथा च कदली नदी। नामाधिपापि च तथा तथा सौमित्रसङ्गतम्। इन्द्रनीलं महानादं तथा च प्रियमेलकम्। एतान्यपि सदा श्राद्धे प्रशस्तान्यधिकानि च। एतेषु सर्वदेवानां सान्निध्यं पठ्यते यतः। दानमेतेषु सर्वेषु भवेत् कोटिशताधिकम्। बाहुदा च नदी पुण्या तथा सिद्धवनं शुभम्। तीर्थं पाशुपतञ्चैव नदी पर्पटिका तथा। श्राद्धमेतेषु सर्वेषु दत्तं कोटिशताधिकम्। तथैव पर्वतीर्थञ्च त्रिपुरं खाण्डवं नदी। धुता लिङ्गसहस्रेण सव्येतरजलावहा। जामदग्न्यस्य सत्तीर्थं वेदायतनमुत्तमम्। प्रतीकस्याभया सिद्धा यदा गोदावरी नदी। तीर्थं तद्भव्यकव्यात्तामप्सरोगणसंयुतम्। श्राद्धादिदानकार्य्यञ्च तद्वत् कोटिशताधिकम्। तथा सहस्रलिङ्गञ्च राघवेश्वरमुत्तमम्। सेन्द्रफला नदी पुण्या यत्र दुःखाद्गतः पुरम्। निमेश्च